॥ वाल्मीकि रामायण॥

६ युद्धकाण्ड

अध्याय १४

तस्य रामस्य सुप्तस्य कुशास्तीर्णे महीतले ।
नियमादप्रमत्तस्य निशास्तिस्रोऽतिचक्रमुः ॥ १॥

न च दर्शयते मन्दस्तदा रामस्य सागरः ।
प्रयतेनापि रामेण यथार्हमभिपूजितः ॥ २॥

समुद्रस्य ततः क्रुद्धो रामो रक्तान्तलोचनः ।
समीपस्थमुवाचेदं लक्ष्मणं शुभलक्ष्मणम् ॥ ३॥

पश्य तावदनार्यस्य पूज्यमानस्य लक्ष्मण ।
अवलेपं समुद्रस्य न दर्शयति यत्स्वयम् ॥ ४॥

प्रशमश्च क्षमा चैव आर्जवं प्रियवादिता ।
असामर्थ्यं फलन्त्येते निर्गुणेषु सतां गुणाः ॥ ५॥

आत्मप्रशंसिनं दुष्टं धृष्टं विपरिधावकम् ।
सर्वत्रोत्सृष्टदण्डं च लोकः सत्कुरुते नरम् ॥ ६॥

न साम्ना शक्यते कीर्तिर्न साम्ना शक्यते यशः ।
प्रातुं लक्ष्मण लोकेऽस्मिञ्जयो वा रणमूर्धनि ॥ ७॥

अद्य मद्बाणनिर्भिन्नैर्मकरैर्मकरालयम् ।
निरुद्धतोयं सौमित्रे प्लवङ्गैः पश्य सर्वतः ॥ ८॥

महाभोगानि मत्स्यानां करिणां च करानिह ।
भोगांश्च पश्य नागानां मया भिन्नानि लक्ष्मण ॥ ९॥

सशङ्खशुक्तिका जालं समीनमकरं शरैः ।
अद्य युद्धेन महता समुद्रं परिशोषये ॥ १०॥

क्षमया हि समायुक्तं मामयं मकरालयः ।
असमर्थं विजानाति धिक्क्षमामीदृशे जने ॥ ११॥

चापमानय सौमित्रे शरांश्चाशीविषोपमान् ।
अद्याक्षोभ्यमपि क्रुद्धः क्षोभयिष्यामि सागरम् ॥ १२॥

वेलासु कृतमर्यादं सहसोर्मिसमाकुलम् ।
निर्मर्यादं करिष्यामि सायकैर्वरुणालयम् ॥ १३॥

एवमुक्त्वा धनुष्पाणिः क्रोधविस्फारितेक्षणः ।
बभूव रामो दुर्धर्षो युगान्ताग्निरिव ज्वलन् ॥ १४॥

सम्पीड्य च धनुर्घोरं कम्पयित्वा शरैर्जगत् ।
मुमोच विशिखानुग्रान्वज्राणीव शतक्रतुः ॥ १५॥

ते ज्वलन्तो महावेगास्तेजसा सायकोत्तमाः ।
प्रविशन्ति समुद्रस्य सलिलं त्रस्तपन्नगम् ॥ १६॥

ततो वेगः समुद्रस्य सनक्रमकरो महान् ।
सम्बभूव महाघोरः समारुतरवस्तदा ॥ १७॥

महोर्मिमालाविततः शङ्खशुक्तिसमाकुलः ।
सधूमपरिवृत्तोर्मिः सहसाभून्महोदधिः ॥ १८॥

व्यथिताः पन्नगाश्वासन्दीप्तास्या दीप्तलोचनाः ।
दानवाश्च महावीर्याः पातालतलवासिनः ॥ १९॥

ऊर्मयः सिन्धुराजस्य सनक्रमकरास्तदा ।
विन्ध्यमन्दरसङ्काशाः समुत्पेतुः सहस्रशः ॥ २०॥

आघूर्णिततरङ्गौघः सम्भ्रान्तोरगराक्षसः ।
उद्वर्तित महाग्राहः संवृत्तः सलिलाशयः ॥ २१॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com